# Vishnuproktam Shivarchanopadesham 1

# વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશમ્ ૧

## Document Information

Text title : Vishnuproktam Shivarchanopadesham 1

File name : viShNuproktaMshivArchanopadesham1.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 20| 47-58.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# Vishnuproktam Shivarchanopadesham 1

# વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશમ્ ૧

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

- બ્રહ્માવિષ્ણુસંવાદે -

શિવપૂજાં વિના નાન્યદ્વિહિતં મોક્ષકારણમ્ ।
ધર્માર્થકામમોક્ષાણાં સાધનં શિવપૂજનમ્ ॥ ૪૭॥

યઃ શં કરોતિ સર્વેષાં સ્મૃતઃ સમ્પૂજિતઃ પ્રભુઃ ।
સ શઙ્કરઃ પૂજનીયો નિયમેનાન્વહં મુદા ॥ ૪૮॥

ય શિવો મઙ્ગલાજાનિઃ વિધત્તે મઙ્ગલં નૃણામ્ ।
સ એવ શઙ્કરસ્તસ્માત્તસ્યૈવાભ્યર્ચનં વરમ્ ॥ ૪૯॥

શઙ્કરં યોઽર્ચયેન્નિત્યં ત્રિકાલં સર્વસાધનૈઃ ।
શઙ્કરઃ શં કરોત્યેવ પ્રીતસ્તન્નિયમાત્પ્રભુઃ ॥ ૫૦॥

સંસારસાગરં તર્તું તર્નિર્નામૈવ શાઙ્કરમ્ ।
નાન્યનામ તથાઽસારઘોરસંસારતારકમ્ ॥ ૫૧॥

શાઙ્કરં નામ વિમલમિષ્ટાર્થફલદં વિધે ।
તન્નામ મુક્તિદં ભવ્યં સંસારભયનાશકમ્ ॥ ૫૨॥

શઙ્કરસ્મરણં નિત્યં તથા શઙ્કરપૂજનમ્ ।
ઇહામુત્રાર્થલાભાય કર્તવ્યં નિત્યકર્મવત્ ॥ ૫૩॥

તત્ત્યાગે તુ ભવત્યેવ પ્રવેશો નિરયે નૃણામ્ ।
કૃતાદ્યેષુ ચ સર્વેષુ યુગેષુ ભવમુક્તયે ॥ ૫૪॥

પૂજનીયો મહાદેવો બ્રાહ્મણૈશ્ચ સુરાસુરૈઃ ।
હરઃ સ્મરહરો બ્રહ્મન્ઘોરસંસારતારકઃ ॥ ૫૫॥

હૃતઃ સ્મરો મહેશેન સ સંસારપ્રવર્તકઃ ।
પરં ત્વવ્યભિચારેણ ભક્તિઃ કાર્યા મહેશ્વરે ॥ ૫૬॥

સા નાશયતિ સંસારં ભક્તિરવ્યભિચારિણી ।
યથા પતિવ્રતા શુદ્ધા નાન્યં કામયતે તથા ॥ ૫૭॥

શાઙ્કરઃ શઙ્કરાદન્યં નાર્ચયત્યેવ સર્વથા । ૫૮.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશં ૧ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૦। ૪૭-૫૮.૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 20 . 47-58.1..

Notes:
Viṣṇu વિષ્ણુ gives Upadeśa ઉપદેશ to Brahmā બ્રહ્મા about several merits of worshiping Śiva શિવ, especially Mokṣa મોક્ષ.

Proofread by Ruma Dewan

---

*Vishnuproktam Shivarchanopadesham 1*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*